# ***શ્રી વિષ્ણુ સૂક્તમ***

ૐ વિષ્ણોર્નુકં વીર્યાણિ પ્રવોચં યઃ પાર્થિવાનિ વિમમે રજાગંસિ યો અસ્કભાયદુત્તરં સધસ્થં વિચક્રમાણસ્ત્રેધોરુગાયો વિષ્ણોરરાટમસિ વિષ્ણોઃ પૃષ્ઠમસિ વિષ્ણોઃ શ્નપ્ત્રેસ્થો વિષ્ણોસ્સ્યૂરસિ વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવમસિ વિષ્ણવે ત્વા ॥

તદસ્ય પ્રિયમભિપાથો અશ્યામ । નરો યત્ર દેવયવો મદન્તિ । ઉરુક્રમસ્ય સ હિ બન્ધુરિત્થા । વિષ્ણોઃ પદે પરમે મધ્વ ઉત્સઃ । પ્રતદ્વિષ્ણુસ્સ્તવતે વીર્યાય । મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ । યસ્યોરુષુ ત્રિષુ વિક્રમણેષુ । અધિક્ષિયન્તિ ભુવનાનિ વિશ્વા । પરો માત્રયા તનુવા વૃધાન । ન તે મહિત્વમન્વશ્નુવન્તિ ॥

ઉભે તે વિદ્મ રજસી પૃથિવ્યા વિષ્ણો દેવત્વમ । પરમસ્ય વિત્સે । વિચક્રમે પૃથિવીમેષ એતામ । ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન । ધ્રુવાસો અસ્ય કીરયો જનાસઃ । ઊરુક્ષિતિં સુજનિમાચકાર । ત્રિર્દેવઃ પૃથિવીમેષ એતામ । વિચક્રમે શતર્ચસં મહિત્વા । પ્રવિષ્ણુરસ્તુ તવસસ્તવીયાન । ત્વેષગ્ગ-હ્યસ્ય સ્થવિરસ્ય નામ ॥

અતો દેવા અવન્તુનો યતો વિષ્ણુ-ર્વિચક્રમે । પૃથિવ્યાસ્સપ્ત ધામભિઃ । ઈદં વિષ્ણુ-ર્વિચક્રમે ત્રેધા નિદધે પદમ । સમૂઢમસ્ય પાગં સુરે । ત્રીણિ પદા વિચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ । તતો ધર્માણિ ધારયન । વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે । ઈન્દ્રસ્ય યુજ્યસ્સખા ॥

તદ્વિષ્ણોઃ પરમં પદગં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ । તદ્વિપ્રાસો વિપન્યવો જાગૃવાગં સસ્સમિન્ધતે । વિષ્ણો-ર્યત્પરમં પદમ । પર્યાપ્ત્યા અનન્તરાયાય સર્વસ્તોમોટતિ રાત્ર ઉત્તમ મહર્ભવતિ સર્વસ્યાપ્ત્યૈ સર્વસ્ય જિત્યૈ સર્વમેવ તેનાપ્નોતિ સર્વં જયતિ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

www.YouSigma.com